# श्रीमद् भागवत रसिक कुटुंब

## तुलसीस्तुतिः

तुलसि श्रीसखि शुभे पापहारिणि पुण्यदे ।
नमस्ते नारदनुते नारायणमनः(फ्)प्रिये ॥ 1॥

मनः(फ्) प्रसादजननि सुखसौभाग्यदायिनि ।
आधिव्याधिहरे देवि तुलसि त्वां(न्) नमाम्यहम् ॥ 2॥

यन्मूले सर्वतीर्थानि यन्मध्ये सर्वदेवताः ।
यदग्रे सर्व वेदाश्च तुलसि त्वां(न्) नमाम्यहम् ॥ 3॥

अमृतां(म्) सर्वकल्याणीं(म्) शोकसन्तापनाशिनीम् ।
आधिव्याधिहरीं(न्) नृणां(न्) तुलसि त्वां(न्) नमाम्यहम् ॥ 4॥

देवैस्त्वं(न्) निर्मिता पूर्वं(म्) अर्चितासि मुनीश्वरैः ।
नमो नमस्ते तुलसि पापं(म्) हर हरिप्रिये ॥ 5॥

सौभाग्यं(म्) सन्ततिं(न्) देवि धनं(न्) धान्यं(ञ्) च सर्वदा ।
आरोग्यं(म्) शोकशमनं(ङ्) कुरु मे माधवप्रिये ॥ 6॥

तुलसी पातु मां(न्) नित्यं(म्) सर्वापद्भ्योऽपि सर्वदा ।
कीर्तिताऽपि स्मृता वाऽपि पवित्रयति मानवम् ॥ 7॥

या दृष्टा निखिलाघसङ्घशमनी स्पृष्टा वपुः(फ्)पावनी
रोगाणामभिवन्दिता निरसनी सिक्ताऽन्तकत्रासिनी ।
प्रत्यासत्तिविधायिनी भगवतः(ख्) कृष्णस्य सं(म्)रोपिता
न्यस्ता तच्चरणे विमुक्तिफलदा तस्यै तुलस्यै नमः ॥ 8॥

इति तुलसीस्तुतिः(स्) समाप्ता ।

## वृन्दादेव्यष्टकम्

गाङ्गेयचाम्पेयतडिद्विनिन्दि, रोचिः(फ्)प्रवाहस्नपितात्मवृन्दे ।
बन्धूकबन्धुद्युतिदिव्यवासो, वृन्दे नमस्ते चरणारविन्दम् ॥1॥

बिम्बाधरोदित्वरमन्दहास्य, नासाग्रमुक्ताद्युतिदीपितास्ये ।
विचित्ररत्नाभरणश्रियाढ्ये, वृन्दे नमस्ते चरणारविन्दम् ॥2॥

समस्तवैकुण्ठशिरोमणौ श्री- कृष्णस्य वृन्दावनधन्यधामिन् ।
दत्ताधिकारे वृषभानुपुत्र्या, वृन्दे नमस्ते चरणारविन्दम् ॥3॥

त्वदाज्ञया पल्लवपुष्पभृङ्ग- मृगादिभिर्माधवकेलिकुञ्जाः ।
मध्वादिभिर्भान्ति विभूष्यमाणा, वृन्दे नमस्ते चरणारविन्दम् ॥ 4॥

त्वदीयदौत्येन निकुञ्जयूनो, अत्युत्कयोः(ख्) केलिविलाससिद्धिः ।
त्वत्सौभगं(ङ्) केन निरुच्यतां(न्) तद्- वृन्दे नमस्ते चरणारविन्दम् ॥ 5॥

रासाभिलाषो वसतिश्च वृन्दा- वने त्वदीशाङ्घ्रिसरोजसेवा ।
लभ्या च पुं(म्)सां(ङ्) कृपया तवैव, वृन्दे नमस्ते चरणारविन्दम् ॥6॥

त्वं(ङ्) कीर्त्यसे सात्वततन्त्रविद्भिर्- लीलाभिधाना किल कृष्णशक्तिः ।
तवैव मूर्तिस्तुलसी नृलोके, वृन्दे नमस्ते चरणारविन्दम् ॥7॥

भक्त्या विहीना अपराधलेशैः(ख्), क्षिप्ताश्च कामादितरङ्गमध्ये ।
कृपामयि त्वां(म्) शरणं(म्) प्रपन्ना, वृन्दे नमस्ते चरणारविन्दम् ॥8॥

वृन्दाष्टकं(यँ) यः(श्) शृणुयात्पठेच्च, वृन्दावनाधीशपदाब्जभृङ्गः ।
स प्राप्य वृन्दावननित्यवासं(न्), तत्प्रेमसेवां(लँ) लभते कृतार्थः ॥9॥

॥ इति विश्वनाथचक्रवर्तीठकुरकृतं(वँ) वृन्दादेव्यष्टकं(म्) सम्पूर्णम् ॥

## श्रीतुलसीस्तुतिः(भगवत्कृता)

वृंदा वृन्दावनी विश्व-पावनी विश्वपूजिता ।
पुष्पसारा नंदिनी च, तुलसी कृष्णजीवनी ॥
एतन्नामाष्टकं(ञ्) चैव, स्तोत्रं(न्) नामार्थसंयुतम् ।
यः(फ्) पठेत् तां(ञ्) च सम्पूज्य, सोऽश्वमेधफलं(लँ) लभेत् ॥
श्रीभगवानुवाच
वृन्दारूपाश्च वृक्षाश्च, यदैकत्र भवन्ति च ।
विदुर्बुधास्तेन वृन्दां(म्), मत्प्रियां(न्) तां(म्) भजाम्यहम् ॥1॥

पुरा बभूव या देवी, त्वादौ वृन्दावने वने ।
तेन वृन्दावनी ख्याता, सौभाग्यां(न्) तां(म्) भजाम्यहम् ॥2॥

असं()ख्येषु च विश्वेषु, पूजिता या निरन्तरम् ।
तेन विश्वपूजिताख्यां(ञ्), जगत्पूज्यां(म्) भजाम्यहम् ॥3॥

असं(ङ्)ख्यानि च विश्वानि, पवित्राणि यया सदा ।
तां(वँ्) विश्वपावनीं(न्) देवीं(वँ्), विरहेण स्मराम्यहम् ॥4॥

देवा न तुष्टाः(फ्) पुष्पाणां(म्), समूहेन यया विना ।
तां(म्) पुष्पसारां(म्) शुद्धां(ञ्) च, द्रष्टुमिच्छामि शोकतः॥5॥

विश्वे यत्प्राप्तिमात्रेण, भक्तानन्दो भवेद् ध्रुवम्।
नन्दिनी तेन विख्याता, सा प्रीता भवताद्धि मे ॥6॥

यस्या देव्यास्तुला नास्ति, विश्वेषु निखिलेषु च ।
तुलसी तेन विख्याता, तां(यँ्) यामि शरणं(म्) प्रियाम् ॥7॥

कृष्णजीवनरूपा या, शश्वत्प्रियतमा सती ।
तेन कृष्णजीवनीति, मम रक्षतु जीवनम् ॥8॥

॥ इति श्रीब्रह्मवैवर्तमहापुराणे प्रकृतिखण्डे भगवत्कृता तुलसीस्तुतिः(स्) संपूर्णा॥

## श्रीतुलसी अष्टोत्तरशतनामावली

### तुलसी महारानी नमो नमः हरि की पटरानी नमो नमः

1. ॐ तुलस्यै नमो नमः 2. नन्दिन्यै च नमो नमः

3. ॐ देव्यै नमो नमः 4. ॐ शिखिन्यै नमो नमः

5. ॐ धारिण्यै नमो नमः 6. ॐ धात्र्यै  नमो नमः

7. ॐ सावित्र्यै नमो नमः 8. सत्यसन्धायै नमः

9.  कालहारिण्यै नमः 10. ॐ गौर्यै नमो नमः

तुलसी महारानी नमो नमः हरि की पटरानी नमो नमः

11.  देवगीतायै नमः 12.  द्रवीयस्यै नमो नमः

13. ॐ पद्मिन्यै नमो नमः 14. ॐ सीतायै नमः

15. ॐ रुक्मिण्यै नमो नमः16. प्रियभूषणायै नमः

17. ॐ श्रेयस्यै नमो नमः 18. ॐ श्रीमत्यै नमो नमः

19. ॐ मान्यायै नमः 20. मोक्षदात्र्यै नमो नमः ।

तुलसी महारानी नमो नमः हरि की पटरानी नमो नमः

21. गौतमार्चितायै नमः 22. ॐ त्रेतायै नमः

23. ॐ त्रिपथगायै नमः 24. ॐ त्रिपादायै नमः

25. ॐ त्रैमूर्त्यै नमो नमः 26. जगत्रयायै नमो नमः

27. ॐ त्रासिन्यै नमो नमः 28. ॐ गात्रायै नमः

29.  ॐ गात्रियायै नमः 30.  गर्भवारिण्यै नमः

तुलसी महारानी नमो नमः हरि की पटरानी नमो नमः

31. ॐ शोभनायै नमः 32. ॐ समायै नमो नमः

33. ॐ द्विरदायै नमः 34. ॐ आराद्यै नमो नमः

35.  यज्ञविद्यायै नमः 36.  महाविद्यायै नमः

37.  गुह्यविद्यायै नमः 38. ॐ कामाक्ष्यै नमो  नमः

39. ॐ कुलायै नमो नमः 40. ॐ श्रीयै नमो नमः

तुलसी महारानी नमो नमः हरि की पटरानी नमो नमः

41. ॐ भूम्यै नमो नमः 42. ॐ भवित्र्यै नमो नमः

43. ॐ सावित्र्यै नमो नमः 44. सर्ववेदविदाम्वरायै नमः

45. ॐ शंखिन्यै नमो नमः 46. ॐ चक्रिण्यै नमो नमः

47. ॐ चारिण्यै नमो नमः 48. चपलेक्षणायै नमः

49. पीताम्बरायै नमः 50. प्रोत सोमायै नमः

तुलसी महारानी नमो नमः हरि की पटरानी नमो नमः

51. सौरसायै नमो नमः 52. ॐ अक्षिण्यै नमो नमः

53. ॐ अम्बायै नमो नमः 54. सरस्वत्यै नमो नमः

55. संश्रयायै नमो नमः 56. सर्व देवत्यै नमः

57. विश्वाश्रयायै नमः 58. सुगन्धिन्यै नमो नमः

59. ॐ सुवासनायै नमः 60. ॐ वरदायै नमः

तुलसी महारानी नमो नमः हरि की पटरानी नमो नमः

61. ॐ सुश्रोण्यै नमः 62. चन्द्रभागायै नमः

63. यमुनाप्रियायै नमः 64. ॐ कावेर्यै नमो नमः

65. मणिकर्णिकायै नमः66. अर्चिन्यै च नमो नमः

67. ॐ स्थायिन्यै नमो नमः 68. दानप्रदायै नमः

69. ॐ धनवत्यै नमः 70. सोच्यमानसायै नमः

तुलसी महारानी नमो नमः हरि की पटरानी नमो नमः

71. ॐ शुचिन्यै नमो नमः 72. ॐ श्रेयस्यै नमो नमः

73. प्रीतिचिन्तेक्षण्यै नमः 74. ॐ विभूत्यै नमो नमः

75. ॐ आकृत्यै नमो नमः 76. आविर्भूत्यै नमो नमः

77. ॐ प्रभाविन्यै नमः 78. ॐ गन्धिन्यै नमो नमः

79. ॐ स्वर्गिन्यै नमो नमः 80. ॐ गदायै नमो नमः

तुलसी महारानी नमो नमः हरि की पटरानी नमो नमः

81. ॐ वेद्यायै नमः 82. ॐ प्रभायै नमो नमः

83. ॐ सारस्यै नमो नमः 84. सरसिवासायै नमः

85. जगद्धात्र्यै नमो नमः 86. शरावत्यै नमो नमः

87. ॐ रसिन्यै नमो नमः 88. ॐ कालिन्यै नमो नमः

89. श्रेयोवत्यै नमो नमः 90. ॐ यामायै नमो नमः

तुलसी महारानी नमो नमः हरि की पटरानी नमो नमः

91. ब्रह्मप्रियायै नमः 92. श्यामसुन्दरायै नमः

93. रत्नरूपिण्यै नमः 94. शमनिधिन्यै नमो नमः

95. शतानन्दायै नमः 96. ॐ शतद्युतये नमः

97. शितिकण्ठायै नमो नमः 98. ॐ प्रयायै नमो नमः

99. ॐ धात्र्यै नमो नमः 100. वृन्दावन्यै नमो नमः

तुलसी महारानी नमो नमः हरि की पटरानी नमो नमः

101. ॐ कृष्णायै नमः 102. भक्तवत्सलायै नमः

103. गोपिकाक्रीडायै नमः 104.ॐ हरायै नमो नमः

105. अमृतरूपिण्यै नमः 106. ॐ भूम्यै नमो नमः

107. कृष्णकान्तायै नमः 108. विष्णुप्रियायै नमः ॥

## तुलसी महिमा

तव केशसमूहाश्च, पुण्यवृक्षा भवन्त्विति ।

तुलसीकेशसम्भूतास्- तुलसीति च विश्रुताः ॥ 1॥

त्रिषु लोकेषु पुष्पाणां, पत्राणां(न्) देवपूजने ।
प्रधानरूपा तुलसी, भविष्यति वरानने ॥ 2॥

स्वर्गे मर्त्ये च पाताले, वैकुण्ठे मम सन्निधौ ।
भवन्तु तुलसीवृक्षा, वराः(फ्) पुष्पेषु सुन्दरि ॥3॥

गोलोके विरजातीरे, रासे वृन्दावने भुवि ।
भाण्डीरे चम्पकवने, रम्ये चन्दनकानने ॥ 4॥

माधवीकेतकीकुन्द-मल्लिकामालतीवने ।
भवन्तु तरवस्तत्र, पुण्यस्थानेषु पुण्यदाः ॥ 5 ॥

तुलसीतरुमूले च, पुण्यदेशे सुपुण्यदे ।
अधिष्ठानं(न्) तु तीर्थानां, सर्वेषां(ञ्) च भविष्यति ॥ 6॥

तत्रैव सर्वदेवानां, समधिष्ठानमेव च ।
तुलसीपत्रपतन- प्राप्तये च वरानने ॥ 7 ॥

स स्नातः(स्) सर्वतीर्थेषु, सर्वयज्ञेषु दीक्षितः ।
तुलसीपत्रतोयेन, योऽभिषेकं समाचरेत् ॥8 ॥

सुधाघटसहस्रेण, सा तुष्टिर्न भवेद्धरेः ।
या च तुष्टिर्भवेन्नृणां(न्), तुलसीपत्रदानतः ॥ 9॥

गवामयुतदानेन, यत्फलं(लँ) लभते नरः ।
तुलसीपत्रदानेन, तत्फलं(लँ) लभते सति ॥ 10॥

तुलसीपत्रतोयं(ञ्) च, मृत्युकाले च यो लभेत् ।
मुच्यते सर्वपापेभ्यो, विष्णुलोकं स गच्छति ॥11 ॥

नित्यं(यँ) यस्तुलसीतोयं, भुङ्क्ते भक्त्या च मानवः ।
स एव जीवन्मुक्तश्च, गंगास्नानफलं(लँ) लभेत् ॥ 12॥

नित्यं(यँ) यस्तुलसीं(न्) दत्त्वा, पूजयेन्मां(ञ्) च मानवः ।
लक्षाश्वमेधजं पुण्यं(लँ), लभते नात्र संशयः ॥ 13 ॥

तुलसीं स्वकरे कृत्वा, देहे धृत्वा च मानवः ।
प्राणांस्त्यजति तीर्थेषु, विष्णुलोकं स गच्छति ॥ 14॥

तुलसीकाष्ठनिर्माण-मालां(ङ्) गृह्णाति यो नरः ।
पदे पदेऽश्वमेधस्य, लभते निश्चितं फलम् ॥15 ॥

तुलसीं स्वकरे धृत्वा, स्वीकारं(यँ) यो न रक्षति ।
स याति कालसूत्रं(ञ्) च, यावच्चन्द्रदिवाकरौ ॥16 ॥

करोति मिथ्या शपथं(न्), तुलस्या यो हि मानवः ।
स याति कुम्भीपाकं(ञ्) च, यावदिन्द्राश्चतुर्दश ॥17 ॥

तुलसीतोयकणिकां, मृत्युकाले च यो लभेत् ।
रत्नयानं समारुह्य, वैकुण्ठं स प्रयाति च ॥ 18॥

पूर्णिमायाममायां(ञ्) च, द्वादश्यां रविसंक्रमे ।
तैलाभ्यंगे चास्नाते च, मध्याह्ने निशि सन्ध्ययोः ॥ 19॥

अशौचेऽशुचिकाले वा, रात्रिवासोऽन्विता नराः ।
तुलसीं(यँ) ये विचिन्वन्ति, ते छिन्दन्ति हरेः(श्) शिरः ॥ 20॥

त्रिरात्रं(न्) तुलसीपत्रं, शुद्धं पर्युषितं सति ।
श्राद्धे व्रते च दाने च, प्रतिष्ठायां सुरार्चने ॥21॥

भूगतं(न्) तोयपतितं(यँ), यद्दत्तं(वँ) विष्णवे सति ।
शुद्धं(ञ्) च तुलसीपत्रं(ङ्), क्षालनादन्यकर्मणि ॥ 22॥
॥इति श्रीतुलसीमहिमा संपूर्णा ॥

## तुलसीकवचम्

**श्रीगणेशाय नमः**

अस्य श्रीतुलसीकवचस्तोत्रमन्त्रस्य श्रीमहादेवऋषिः ।
अनुष्टुप्छन्दः । श्रीतुलसी देवता ।
मम ईप्सितकामनासिद्ध्यर्थं(ञ्) जपे विनियोगः ।

तुलसि श्रीमहादेवि, नमः(फ्) पङ्कजधारिणि ।
शिरो मे तुलसी पातु, भालं(म्) पातु यशस्विनी ॥ 1॥

दृशौ मे पद्मनयना, श्रीसखी श्रवणे मम ।
घ्राणं(म्) पातु सुगन्धा मे, मुखं(ञ्) च सुमुखी मम ॥ 2॥

जिह्वां(म्) मे पातु शुभदा, कण्ठं(वँ) विद्यामयी मम ।
स्कन्धौ कह्लारिणी पातु, हृदयं(वँ) विष्णुवल्लभा ॥ 3॥

पुण्यदा मे पातु मध्यं(न्), नाभिं(म्) सौभाग्यदायिनी ।
कटिं(ङ्) कुण्डलिनिं(म्) पातु, ऊरू नारदवन्दिता ॥ 4॥

जननी जानुनी पातु, जङ्घे सकलवन्दिता ।
नारायणप्रिया पादौ, सर्वाङ्गं(म्) सर्वरक्षिणी ॥ 5॥

सङ्कटे विषमे दुर्गे, भये वादे महाहवे ।
नित्यं(म्) हि सन्ध्ययोः(फ्) पातु, तुलसी सर्वतः(स्) सदा ॥ 6॥

इतीदं(म्) परमं(ङ्) गुह्यं(न्), तुलस्याः(ख्) कवचामृतम् ।
मर्त्यानाममृतार्थाय, भीतानामभयाय च ॥ 7॥

मोक्षाय च मुमुक्षूणां(न्), ध्यायिनां(न्) ध्यानयोगकृत् ।
वशाय वश्यकामानां(वँ), विद्यायै वेदवादिनाम् ॥ 8॥

द्रविणाय दरिद्राणां(म्), पापिनां(म्) पापशान्तये ॥ 9॥

अन्नाय क्षुधितानां(ञ्) च, स्वर्गाय स्वर्गमिच्छिताम् ।
पशव्यं(म्) पशुकामानां(म्), पुत्रदं(म्) पुत्रकाङ्क्षिणाम् ॥ 10॥

राज्याय भ्रष्टराज्याना- मशान्तानां(ञ्) च शान्तये ।
भक्त्यर्थं(वँ्) विष्णुभक्तानां(वँ्), विष्णौ सर्वान्तरात्मनि ॥ 11॥

जाप्यं(न्) त्रिवर्गसिद्ध्यर्थं(ङ्), गृहस्थेन विशेषतः ।
उद्यन्तं(ञ्) चण्डकिरण-मुपस्थाय कृताञ्जलिः ॥ 12॥

तुलसीकानने तिष्ठन्-नासीनो वा जपेदिदम् ।
सर्वान्कामानवाप्नोति, तथैव मम सन्निधिम् ॥ 13॥

मम प्रियकरं(न्) नित्यं(म्), हरिभक्तिविवर्धनम् ।
या स्यान्मृतप्रजा नारी, तस्या अङ्गं(म्) प्रमार्जयेत् ॥ 14॥

सा पुत्रं(लँ्) लभते दीर्घ-जीविनं(ञ्) चाप्यरोगिणम् ।
वन्ध्याया मार्जयेदङ्गं(ङ्), कुशैर्मन्त्रेण साधकः ॥ 15॥

सोऽपि सं(वँ्)वत्सरादेव, गर्भं(न्) धत्ते मनोहरम् ।
अश्वत्थे राजवश्यार्थी, जपेदग्नेः(स्) सुरूपभाक् ॥ 16॥

पलाशमूले विद्यार्थी, तेजोऽर्थ्यभिमुखो रवेः ।
कन्यार्थी चण्डिकागेहे, शत्रुहत्यै गृहे मम ॥ 17॥

श्रीकामो विष्णुगेहे च, उद्याने स्त्रीवशा भवेत् ।
किमत्र बहुनोक्तेन, शृणु सैन्येश तत्त्वतः ॥ 18॥

यं(यँ) यं(ङ्) काममभिध्यायेत्- तं(न्) तं(म्) प्राप्नोत्यसं(म्)शयम् ।
मम गेहगतस्त्वं(न्) तु, तारकस्य वधेच्छया ॥ 19॥

जपन् स्तोत्रं(ञ्) च कवचं(न्), तुलसीगतमानसः ।
मण्डलात्तारकं(म्) हन्ता, भविष्यसि न सं(म्)शयः ॥ 20॥

इति श्रीब्रह्माण्डपुराणे तुलसीमाहात्म्ये तुलसीकवचं(म्) सम्पूर्णम् ॥

## श्रीतुलसीस्तोत्रम्

जगद्धात्रि! नमस्तुभ्यं(वँ) विष्णोश्च प्रियवल्लभे ।
यतो ब्रह्मादयो देवाः(स्) सृष्टि स्थित्यन्तकारिणः ॥ 1॥

नमस्तुलसि कल्याणि नमो विष्णुप्रिये शुभे ।
नमो मोक्षप्रदे देवि नमः(स्) सम्पत्प्रदायिके ॥ 2॥

तुलसी पातु मां(न्) नित्यं(म्) सर्वापद्भ्योऽपि सर्वदा ।
कीर्तितापि स्मृता वापि पवित्रयति मानवम् ॥ 3॥

नमामि शिरसा देवीं(न्) तुलसीं(वँ) विलसत्तनुम् ।
यां(न्) दृष्ट्वा पापिनो मर्त्या मुच्यन्ते सर्वकिल्बिषात् ॥ 4॥

तुलस्या रक्षितं(म्) सर्वं(ञ्) जगदेतच्चराचरम् ।
या विनिहन्ति पापानि दृष्ट्वा वा पापिभिर्नरैः ॥ 5॥

नमस्तुलस्यतितरां(यँ) यस्यै बद्धाञ्जलिं(ङ्) कलौ ।

कलयन्ति सुखं(म्) सर्वं(म्) स्त्रियो वैश्यास्तथाऽपरे ॥ 6॥

तुलस्या नापरं(ङ्) किञ्चिद्दैवतं(ञ्) जगतीतले ।
यथा पवित्रितो लोको विष्णुसङ्गेन वैष्णवः ॥ 7॥

तुलस्याः(फ्) पल्लवं(वँ) विष्णोः(श्) शिरस्यारोपितं(ङ्) कलौ ।
आरोपयति सर्वाणि श्रेयां(म्)सि वरमस्तके ॥ 8॥

तुलस्यां(म्) सकला देवा वसन्ति सततं(यँ) यतः ।
अतस्तामर्चयेल्लोके सर्वान् देवान् समर्चयन् ॥ 9॥

नमस्तुलसि सर्वज्ञे पुरुषोत्तमवल्लभे ।
पाहि मां(म्) सर्व पापेभ्यः(स्) सर्वसम्पत्प्रदायिके ॥ 10॥

इति स्तोत्रं(म्) पुरा गीतं(म्) पुण्डरीकेण धीमता ।
विष्णुमर्चयता नित्यं(म्) शोभनैस्तुलसीदलैः ॥ 11॥

तुलसी श्रीर्महालक्ष्मीर्विद्याविद्या यशस्विनी ।
धर्म्या धर्मानना देवी देवीदेवमनः(फ्)प्रिया ॥ 12॥

लक्ष्मीप्रियसखी देवी द्यौर्भूमिरचला चला ।
षोडशैतानि नामानि तुलस्याः(ख्) कीर्तयन्नरः ॥ 13॥

लभते सुतरां(म्) भक्तिमन्ते विष्णुपदं(लँ) लभेत् ।

तुलसी भूर्महालक्ष्मीः(फ्) पद्मिनी श्रीर्हरिप्रिया ॥ 14॥

तुलसि श्रीसखि शुभे पापहारिणि पुण्यदे ।
नमस्ते नारदनुते नारायणमनः(फ्)प्रिये ॥ 15॥

इति श्रीपुण्डरीककृतं(न्) तुलसीस्तोत्रं(म्) सम्पूर्णम् ॥

